## प्रथमोऽध्यायः ।।

### सकलमन्त्राणां विष्णुपरत्वप्रतिपादनम् ।

ॐकारेण सकलमन्त्राणां सर्ववर्णानां च अभिव्यक्तिरभूत् । ॐकारः विष्णोः सकलगुणपरिपूर्णत्वं प्रतिपादयति । तच्च प्रतिपादितं श्रीमदाचार्यैः अनुव्याख्याने''ओतत्ववाची ह्योङ्कारः वक्त्यसौ तद्गुणोततताम् ''(अनु.१.१.९) इति । सकलगुणपूर्णत्वं विष्णोरेव नान्यस्य । ॐब्रह्म इति श्रुतिः ''ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः'' ( गी.१७.२३) इति स्मृतिश्चात्र प्रमाणम् ।।

### प्रणवस्याष्टाक्षरत्वसमर्थनम् ।

प्रणवः अकारोकारमकारनादविन्दुघोषशान्तातिशान्तभेदेनाष्टाक्षरवान् । परन्तु प्रणवस्याष्टाक्षरत्वमेव नास्ति । यतः नादादीनामक्षरत्वं न वर्तते । नादादयो वर्णा एव न वर्णधर्माः । 'सोऽयमष्टाक्षरो मतः' । 'वर्णस्तारार्णभेदिताः' 'तारोऽष्टाक्षरभेदवान्' इत्यत्रैव ग्रन्थे बहुवारं नादादिष्वकारादिष्विवाक्षरार्णशव्दप्रयोगात् । 'आद्यैस्तारचतुर्वर्णैः' 'आदिवर्णत्रय' मित्यत्राष्टानां मध्ये चतुर्णां त्रयाणां च वर्णानां आद्यादिशब्दाभ्यां प्रथमवर्णत्वोक्त्या तदन्येषां वर्णत्वस्य ज्ञापितत्वाच्च । अन्यथा प्रथमद्वितीयादिशब्दानां सजातीयेष्वेव प्रयोगस्यास्य गोर्द्वितीयोऽन्वेष्टव्य इत्यादौ सर्वत्र दृष्टत्वेन वर्णावर्णसमुदायमध्ये वर्णेषु प्रथमवर्णत्वोक्त्ययोगात् । वर्णत्रयमित्येवोक्तिप्रसङ्गाच्च । बृहुद्भाष्येऽपि–

चतुर्थपादो गायत्र्याः प्रणवः समुदाहृतः ।
अकाराद्यतिशान्तान्तः प्रणवोऽष्टाक्षरो यतः ।। (भृ.भा.७-१)

इति गायत्र्याः अष्टाक्षरोपेतपादचतुष्टयवत्वं वक्तुं प्रणवांशानां नादादीनां अक्षरत्वमङ्गीकृत्य प्रणवस्याष्टाक्षरत्वोक्तेश्च । नादादीनामक्षरत्वे पञ्चाशदक्षरापेक्षयाऽधिकाक्षरापत्तेश्चेति चेन्न । भूताकाशगुणध्वनिभिरस्मदादिव्यङ्ग्यानां पञ्चाशत्त्वेऽपि 'अनन्तमात्रान्तमुदाहरन्ति यम्' इत्यादिषु अभियुक्तैर्मातृकापदव्यवहारात् नादादीनामनन्तानामस्मदादिध्वन्यव्यङ्ग्यानामक्षराणामभ्युपगमे बाधकाभावात् । एतेन प्रणवस्याष्टाक्षरत्वं सिद्ध्यति ।

अष्टक्षरात्मकः प्रणवः स्वावयवैरकारादिभिर्वर्णैः विश्वतैजसप्राज्ञतुरीयात्मान्तरात्मपरमात्मज्ञानात्मना मष्टानां वाचकः ।

### मातृकामन्त्राणां तत्प्रतिपाद्यमूर्तीनामभिव्यक्तिः।

प्रणवाष्टाक्षरैः अकारादिपञ्चाशद्वर्णाः अभिव्यक्ताः । अकारादिपञ्चाशद्वर्णप्रतिपाद्याजादिपञ्चाशन्मूर्तयः प्रणवप्रतिपाद्यविश्वाद्यष्टमूर्तिभिर्व्यक्ताः । तदित्थम् - अकारादि अः इत्यन्तं षोडशवर्णा एको वर्गः प्रणवावयवादकारादभिव्यक्तः । प्रणवावयवादुकारात् कवर्गगाः पञ्चवर्णा ङकारान्ताः, प्रणवावयवात् मकारात् चवर्गगाः चकारादयो ञकारान्ताः, प्रणवावयवात् नादात् टवर्गगाः टकारादयो णकारान्ताः पञ्चवर्णाः, प्रणवावयवात् बिन्दोः तकारादयो नकारान्तास्तवर्गगा वर्णाः, प्रणवावयवात् घोषात् पकारादयो मकारान्ताः पवर्गगाः वर्णा अभिव्यक्ताः । एवं चतुर्णां एक उपाधिः । यकारादयो वकारान्ता अन्तस्था

- जपहोमादिसर्वकर्मणां प्रधानाङ्गकथनम्
- गुरुप्रदर्शनपूर्वं तत्पूजाविधानम्
- तारतम्यक्रमेण भक्तिः कार्या
- जपाद्यनुष्ठातुः आवश्यकगुणकथनम्
- विद्यारम्भकाले स्मर्तव्यगुरुनिरूपणम् गुरूमन्त्रयोरवज्ञाकृतेऽनर्थकथनं च
- वेदोक्तधान्वन्तरमन्त्राः धान्वन्तरमन्त्रोक्तजपतर्पणादीनां वराहदिसर्वमन्त्रेष्वतिदेशश्च
- मन्त्रविशेषाणां फलविशेषकथनम्
- विजयाद्युपयुक्ततत्तद्देवताध्यानकथनम्
- द्रविणप्राप्त्यर्थं ध्यानविशेषकथनम्
- फलप्राप्त्यर्थं सामन्यतः ध्याननिरूपणं, सम्पदाद्यर्थं क्रियमाणहोमद्रव्यनिरूपणं च
- सृष्टिस्थितिसंहारभेदेन त्रिविधवर्णन्यासकथनम्
- एकाक्षरमन्त्रमारभ्य त्रयास्त्रिंशदक्षरपर्यन्तं वर्णन्यासस्थानकथनम्
- वर्णन्यासफलकथनं यन्त्रलेखनरप्रकारश्च
- लिखितयन्त्रस्य उपयोगकथनम्
- तारतम्येन गुरुलक्षणाभिधानम्
- तारतम्यानुसारेण गुरुस्वीकारकथनम्
- मोक्षसाधननिरूपणं, निदिध्यासनविभागश्च
- ध्यानाङ्गनिरूपणम्
- यमनियमासनानां विभागः
- ध्यानाङ्गप्राणायमनिरूपणम्
- आसनशौचप्राणायामानां वैराग्यस्य, यमप्रभेदभूतानां अहिंसासत्यास्तेयब्रह्मचर्याणां, हनियमप्रभेदानां तपतुष्टिस्वाध्यायहरिपूजानां तारतम्येन धर्महेतुत्वकथनम्
- अधिकारिविशेषनिष्ठतया श्रवणादेः संख्यापूर्वं तारतम्यकथनम्
- व्याख्यानस्योत्तमत्वे गीताप्रमाणाभिधानम्
- शौचासनयोः सर्वधर्माङ्गत्वात् पृथक् धर्मकारणत्वं नास्ति, प्राणायाममारभ्य ध्यानपर्यन्तं संख्यागणनपुरस्सरं आधिक्यकथनम् च
- वीरपद्मस्वस्तिकासनानां लक्षणाभिधानम्, रेचकादिप्राणायामकालकथनं च
- क्रमेण प्राणायामाभ्यासः कार्यः, रेचकादि करणप्रकारश्च
- सप्रभेदं सुषुम्नानाडीनिरूपणम्
- सुषुम्नानाडीप्रभेदानां स्थानकथनम्, तेषां वर्णकथनम्, नाडीषु ध्येयरूपकथनं च
- नाडीस्थानां पद्मानां स्थानवर्णकथनपुरस्सरं पद्मेषु ध्येयरूपकथनम्
- सुषुम्नायाः परितः विद्यमानेडादिनडीचतुष्टयनिरूपणं तत्र ध्येयरूपकथनं च
- द्वाशाप्तसहस्रनाडीष्वपि भागवान् ध्येयः
- द्वासप्ततिस्थरूपाणां लक्षणानि रहस्यत्वात् ग्रन्थगौरवाच्च नोच्यन्ते
- सप्रभेदं निधिध्यासनायाः लक्षणकथनम्, समाधिसततशास्त्रवमर्शयोः अपरोक्षज्ञानसाधनत्वकथनं च